दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-121

1 22.02.2024 गुरुवासरः वि.सं. २०८० माघशुक्ल त्रयोदशी फाल्गुण १० प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

ओबरायसमूहाय एकवर्षाभ्यन्तरे निजातिथिगृहं रिक्तं कर्तुं सर्वोच्चन्यायालयस्य आदेशः 2



ऑस्ट्रेलियादेशेन षट् स्तोभैः विजिता न्यूजीलैंडविरुद्धम् अतीव रोमांचकारिणी विंशति-विंशतिः क्रिकेट- प्रतिस्पर्धा 3



व्याकरणाध्ययनस्य प्रयोजनानि-५ 4



## प्रमुखाः वार्ताः

### षड्दिनानां अनन्तरं शेयरविपणिः स्खलितः; सेन्सेक्स ४३४ अंकैः पतितः, निफ्टी च २२०५० अंकस्तरमागत्य तूष्णीमभवत्

हिमसंस्कृतवार्ताः- दिलीपः नादौनम्

षड्दिनानां वृद्धेः अनन्तरं बुधवासरे आन्तरिक- शेयरविपणिः रक्तवर्णेन सह शान्तः अभवत्। सप्ताहस्य तृतीयव्यापारदिने "बम्बई- स्टॉक- एक्सचेंज" इत्यस्य सेन्सेक्स्-संस्थायाः ४३४.३१ (०.५९%) अंकैः न्यूनता अभवत्। अपरपक्षे राष्ट्रिय- शेयर-विनिमयस्य निफ्टी २२०५५ अङ्क स्तरमागत्य १४१.११ (०.६४%) अंकैः पतित्वा स्थगितः अभवत्

#### सुवर्णे १५० रुप्यकाणां वृद्धिः, रजतस्य वृद्धिः १०० रुप्यकाणि अभवत्

दिल्ली-बुलियन-विपण्यां बुधवासरे सुवर्णस्य मूल्यं १५० रुप्यकैः वर्धमानं प्रति १० ग्रामं ६२,८५० रूप्यकाणि यावत् अभवत्। अस्मिन्नैव काले रजतस्य अपि १०० रुप्यकाणां वृद्धिः अभवत्, यः प्रतिकिलो ७५,७०० रूप्यकाणि यावत् अभवत्।

#### रुप्यके लघ्वी वृद्धिः अभवत्

बुधवासरे डॉलरस्य विरुद्धं १ पैसा वृद्ध्या रुप्यकाणां बन्दीकरणं जातम्। अन्तरबैङ्क-विदेशीय- विनिमयस्थाने ग्रीनबैकस्य विरुद्धं रुप्यकस्य मूल्यं ८२.९० इति मूल्ये प्रारब्धम्। इदं ८२.८६ इति दिवसान्तर्गतस्य उच्चतमं, ८२.९७ इत्यस्य निम्नतमं च स्पृशति स्म। अन्ततः डॉलरस्य विरुद्धं रूप्यकः ८२.९६ (अस्थायी) इति मूल्ये समाप्तः, यः पूर्वसमाप्तेः ८२.९७ इत्यस्मात् १ पैसा अधिकः आसीत्।

## विश्व-टेबल-टेनिस-प्रतिस्पर्धायां भारतीय महिलादलेन इटलीदलं त्रि-शून्यं इत्यङ्कान्तरालेन पराजिम्



विश्व-टेबल-टेनिस-प्रतिस्पर्धायां दक्षिणकोरियादेशस्य बुसान-नगरे भारतीय महिलादलेन इटलीदलं त्रि-शून्यं इत्यङ्कान्तरालेन पराजिम्। अपराले सार्ध-एकवादने भारतस्य महिलादलस्य षोडशतम-चक्रे चीनी ताइपे-इत्यनेन सह स्पर्धा भविष्यति। मनिका- बत्रा-श्रीजा अकुला-अयहिका मुखर्जी, एताभिः ह्यः स्पेन दलं पराजितम्। भारतीयपुरुषदलेन न्यूजीलैण्ड-दलं त्रि-शून्य इत्यङ्कान्तरालेन पराजितम्।

## भारत-चीनदेशयोः मध्ये कोर-कमांडर-स्तरीयोपवेशनम्

भारत-चीनदेशयोः मध्ये कोर-कमांडर-स्तरीयोपवेशनं अस्य मासस्य एकोनविंशतितमे दिनाङ्के आयोजितम्। चुशूल-मोल्डो सीमायां अस्य उपवेशनस्य इदम् एकविंशतितमं संस्करणम् आसीत्। विदेश मन्त्रालयेन एकस्मिन् कथने प्रोक्तं यत् गतसंस्करणस्य चर्चायां भारत-चीन सीमा-क्षेत्रयोः शान्तेः स्थापनार्थं पूर्वी-लद्दाखे एल-ए-सी इत्यनेन सह शेष-क्षेत्रेषु विघटनस्य याचना विहिता। सौहार्दपूर्ण वातावरणे सम्पन्नायां वार्तायां उभाभ्यामपि पक्षाभ्यां स्वकीय-दृष्टिकोणाः प्रकटीकृताः। सहैव उभावपि पक्षौ प्रासंगिक-सैन्यं-एवं राजनयिकतन्त्र-माध्यमेन संचार-स्थापनार्थं स्वीकृतिं ज्ञापितवन्तौ।

## ग्रीसस्य प्रधानमन्त्रिणा किरियाकोस मित्सोताकिस इत्यमुना सह द्विपक्षीय वार्ता



प्रधानमन्त्री-नरेन्द्रमोदिना नवदिल्ल्यां ग्रीसस्य प्रधानमन्त्रिणा किरियाकोस मित्सोताकिस इत्यमुना सह द्विपक्षीय वार्ता कृता। उभाभ्यामपि देशाभ्यां विभिन्नक्षेत्रीय- अन्ताराष्ट्रिय-प्रकरणानि आलक्ष्य चर्चा विहिता। वार्तानन्तरं उभयोः देशयोः प्रधानमन्त्रिणौ संयुक्त-संवाददाता- सम्मेलनमपि सम्बोधितवन्तौ। ताभ्यां कथितं यत् आतंकवाद-प्रकरणे उभयोः देशयोः चिन्ता समाना एवास्ति। अवसरेऽस्मिन् उभावपि देशौ उच्चशिक्षायाः क्षेत्रे परस्पर-सहयोगार्थं सहमतिं प्रकटितवन्तौ। श्रीमोदिना प्रोक्तं यत् जलपोताश्रय-सम्पर्कः सर्वोच्च-प्राथमिकतायाः क्षेत्रं अस्ति। प्रधानमन्त्री-मोदिना प्रोक्तं यत् वार्तेयं सार्थकी उपयोगी च समजायत। श्री मित्सोताकिस इत्यमुना प्रोदीरितं यत् उभौ देशौ विपक्षीयसम्बन्धान् प्रोत्साह्यितुं एवं रणनीतिकस्तरेऽपि तान् संवर्धयितुं आकांक्षिणौ स्तः। तेनोदीरितं यत् अस्मिन् अवसरे कृषि-पर्यटन-साइबर क्षेत्रं समेत्य विभिन्नक्षेत्रेषु सहयोगं संवर्धयितुं चर्चा समभवत्। इतः पूर्वं उभयोः देशयोः प्रतिनिधिमण्डल-स्तरीया चर्चा अभवत्। श्री मित्सोताकिस इत्येषः भारतस्य चतुर्दिवसात्मक-यात्रायै समागतः। श्री मित्सोताकिस अद्यतन आरभ्य फरवरीमासस्य त्रयोविंशतिः दिनाङ्के यावत् नवदिल्ल्यां आयोज्यमाणे नवमे रायसीना-संवादे मुख्यातिथिः मुख्यवक्ता च भविष्यति। एथेंस प्रति गमनात् पूर्वं सः मुंबई-नगरमपि गमिष्यति। इतः पूर्वं श्री मित्सोताकिस इत्यस्य अद्य प्रातः राष्ट्रपतिभवनस्य प्रांगणे औपचारिकं स्वागतमपि विहितम्। तेन राजघाटे महात्मगान्धिनमपि श्रद्धाञ्जलिः अर्पितम्। इदं पञ्चदशवर्षानन्तरं ग्रीसपक्षतः भारतस्य द्विपक्षीयराष्ट्राध्यक्षीया अथवा शासनस्तरीया यात्रा वर्तते। ग्रीसपक्षतः भारतस्य अन्तिमा प्रधानमन्त्री यात्रा अष्टाधिक-द्विसहस्त्रतमे वर्षे समभवत्।

## प्रख्यातः संवैधानिक-न्यायविद् फली नरीमन इत्यस्य बुधवासरे नवदिल्ल्यां निधनम्



प्रख्यातः संवैधानिक-न्यायविद् फली नरीमन इत्यस्य बुधवासरे नवदिल्ल्यां निधनम् अभवत् सः पञ्चनवतिः वर्षीयः आसीत्। सः अनेकैः रोगैः अपि पीडितः आसीत्। नरीमन् इत्यनेन द्विसप्तत्यधिक-एकोनविंशतिः इत्यतः पञ्चसप्तत्यधिक एकोनविंशतिः यावत् अतिरिक्त- सॉलिसिटर जनरल-रूपेण कार्यं कृतमासीत् सहैव आपत्कालीनावधौ स्वपदात् त्यागपत्रं दत्तमासीत्। तस्य कार्यकालस्य महत्वपूर्ण-अवसरः तदासीत् यदा एकसप्तत्यधिक- एकोनविंशतितमे वर्षे सर्वोच्च न्यायालयेन सः वरिष्ठ अधिवक्तृत्वेन नियुक्तिकृतम् आसीत्। स्वकीय-जीवनकाले तेन बहुषु ऐतिहासिक-प्रकरणेषु वादो विहितः, एतस्मिन् राष्ट्रीय- न्यायिक-नियुक्ति-आयोगस्यापि प्रकरणं विद्यते। सः सप्ताधिक-द्विसहस्रतमवर्षे पद्मविभूषणेन एवं एकनवत्यधिक-एकोनविंशतितमे वर्षे पद्मभूषणेन सम्मानितः आसीत्। अस्मिन् अवसरे राष्ट्रपतिः द्रौपदी मुर्मुः उपराष्ट्रपतिः जगदीप-धनखड़, प्रधानमन्त्री नरेन्द्र मोदी इत्येते च दुःखं प्रकटितवन्तः। तस्य निधनमालक्ष्य राष्ट्रपतिः द्रौपदी मुर्मुः प्रोक्तवती यत् सः न्यायवित्सु एकः महान् व्यक्तिः आसीत्। एकस्मिन् सामाजिक-अन्तर्जालिक सन्देशे उपराष्ट्रपतिः प्रोक्तवान् यत् फली नरीमन सप्तदशकाधिके कार्यकाले भारतीय-विधि-प्रणाल्यां महान् व्यक्तिः आसीत्। प्रधानमन्त्रिणा दुःखं प्रकटीकुर्वता कथितं यत् तेन स्वीय-जीवनं सामान्य नागरिकेभ्यः न्यायं सुलभायितुं समर्पितम्।



## सर्वकारः प्रदर्शनकारी-कृषकैः सह सर्वेषु प्रकरणेषु चर्चायै सन्नद्धो वर्तते-केन्द्रिय-कृषिमन्त्री

केन्द्रिय-कृषिमन्त्री अर्जुनमुण्डा इत्येषः प्रोक्तवान् यत् सर्वकारः प्रदर्शनकारी-कृषकैः सह अग्रिम-चक्रस्य वार्तायां एम.एस.पी. याचना-सस्य-विविधीकरणं-पराली-प्रकरणं-एवं एफ.आई.आर. समेत्य सर्वेषु प्रकरणेषु चर्चायै सन्नद्धो वर्तते। कृषिमन्त्रिणा सामाजिकान्तर्जालिक-सन्देशे कृषकनेतारः पञ्चमचक्रस्य चर्चायै आमन्त्रिताः तेन प्रदर्शनकारी- कृषकाः शान्ति-स्थापनार्थं सम्प्रार्थिताः। केन्द्रेण कृषकाणां आन्दोलनम् आलक्ष्य पंजाब- सर्वकारः व्यवस्था-स्थापनार्थं सम्बोधितः। सूत्रानुसारं केन्द्रिय गृहमन्त्रालयेन एतस्मिन् सन्दर्भे राज्यसर्वकाराय एका परामर्शिकापि प्रेषितास्ति।

## सुभाषितम्

**सेवितव्यो महावृक्षः**
**फलाच्चया समन्विताः।**
**यदि देवदा फलं नास्ति,**
**छाया केन निवार्यते।।**

भावार्थ- एक बड़े वृक्ष की सेवा करनी चाहिए, क्योंकि वह फल और छाया से युक्त होता है। यदि उस महान वृक्ष के फल किसी कारण नहीं भी होते हैं तो क्या उसकी छाया कोई रोक सकता है? अर्थात् वह छाया तो देगा ही।

*✍ प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

# हिमाचलविधानसभायाम् औषधप्रसाधनविधेयकं निवृत्त्यै प्रस्तावः पारितः




**हिमसंस्कृतवार्ता- शिमला।** स्वास्थ्य एवं परिवारकल्याणमंत्री डॉ. धनीरामशांडिलः औषधि एवं प्रसाधनसामग्री हिमाचलप्रदेश- संशोधनविधेयक- २०१६ इत्यस्य प्रतिहर्तुं प्रस्तावः सदने उपस्थापितः। सदनस्य अनुमोदनेन एषः प्रस्तावः निवृत्तः। अस्मिन् विधेयकेन एकं प्रावधानं कृतमासीत् यत् मादकद्रव्यस्य ग्रहणस्य सन्दर्भे पूर्वं अपराधस्य प्रमाणीकरणस्य भारः अभियोजनपक्षस्य उपरि आसीत्, परन्तु अधुना अभियुक्तस्य दायित्वं भविष्यति यत् सः दोषी नास्ति इति सिद्धं कुर्यात्। एतद् प्रत्याभूति रहितं संज्ञेयम् च अपराधं कर्तुम् अपि अनुशंसितम् आसीत्।

पूर्वकाङ्ग्रेससर्वकारे राज्यसभायां एतत् विधेयकं प्रस्तावितं आसीत्। राष्ट्रपतेः सहमत्या राज्यपालस्य कार्यालयद्वारा २०१६ तमस्य वर्षस्य नवम्बर-मासस्य ४ दिनाङ्के प्रसारितम्। अस्मिन् सन्दर्भे केषुचित् बिन्दुषु भारतसर्वकारेण २५ अप्रैल २०१७ दिनाङ्के स्पष्टीकरणं याचितं, यत् १९ सितम्बर् २०१७ दिनाङ्के केन्द्रसर्वकाराय प्रेषितम्। केन्द्रीय- स्वास्थ्य-परिवारकल्याणविभागेन अपि अस्मिन् विषये स्थितिः स्पष्टीकृता। एषः विषयः २०१९ तमस्य वर्षस्य जूनमासस्य २४ दिनाङ्के केन्द्रसर्वकाराय प्रेषितः। केन्द्रसर्वकारेण २०२२ तमस्य वर्षस्य जूनमासस्य २० दिनाङ्के सूचितं यत् अस्मिन् विधेयकस्य हिमाचलप्रदेशसर्वकारेण प्रस्तावितानां संशोधनानाम् औषधप्रसाधन- संशोधनविधेयके २००८ तमे वर्षे पूर्वमेव प्रावधानं वर्तते। राज्यसर्वकारेण एतत् विधेयकं निवृत्तं कर्तुं विचारणीयम्। अस्य विधेयकस्य निवृत्तेः निर्णयः २०२४ तमस्य वर्षस्य जनवरी-मासस्य १२ दिनाङ्के राज्यमन्त्रिमण्डलस्य सत्रे एव कृतः अस्ति।

## चिकित्सकाः कार्य-स्थगनान्दोलने, रोगिणः विपत्तिग्रस्ताः- डॉ जनकराजः

भाजपाविधायकः जनकराजः हिमाचलस्य स्वास्थ्यसुविधानां दुर्दशां वर्तते इति उक्तवान्। चिकित्सकाः कार्य-स्थगनान्दोलनं कृतवन्तः। चिकित्सालयेषु उपकरणानां, औषधानां च अभावः अस्ति। तत्र कर्मचारिणां महत् अभावः अस्ति। आदर्शस्वास्थ्यसंस्थानाम् उद्घाटनस्य घोषणा अपि नगण्या अस्ति। वैद्यानाम् एनपीए-सम्बद्धस्य विषयस्य विषये सर्वकारेण समितिः निर्मिता इति सः अवदत्। येषां कार्यं न कर्त्तव्यं तेषां कृते समितिः निर्मिता भवति।

## वित्तीयस्थितौ उन्नयनं कर्तुं दृढ़पदानि ग्रहीतुं आवश्यकता अस्ति- राजेन्द्रराणा

काङ्ग्रेसविधायकः राजेन्द्रराणा उक्तवान् यत् हिमाचलप्रदेशस्य आर्थिकस्थितिं सुदृढां कर्तुं दृढ़पदानि ग्रहीतुम् आवश्यकता वर्तते। राज्ये पर्यटनक्षेत्रे बहु कार्यं कर्त्तव्यम् अस्ति। विधवापुत्राणां शिक्षणव्ययस्य वहनं प्रशंसनीयम्। सः हमीरपुरे १०० कोटिरूप्यकेण कर्करोगनिवारणसंस्थानस्य स्थापनायाः बजटे घोषणायाः स्वागतं कृतवान्।

## आयव्ययकम् विवरणानां मायाजाले-जम्वालः

भाजपाविधायकः त्रिलोकजमवालः उक्तवान् यत् राज्यसर्वकारेण प्रतिज्ञा अर्थात् गारण्टीनामधेयेन जनता भ्रामिता अस्ति। राज्ये आपदापीडिताः क्षतिपूर्तिं प्राप्तुं न शक्तवन्तः। या परिस्थितिः प्रचलति तया बिलासपुरस्य सदरसहितं 25 ग्रामपंचायताः जलं न प्राप्स्यन्ति। सः बजटं विवरणानां मायाजालं इति अकथयत्।

## आयव्ययके जनाः उपेक्षिताः- बलबीरवर्मा

भाजपाविधायकः बलबीरवर्मा इत्यनेन उक्तं यत् सुक्खुसर्वकारेण स्वस्य द्वयोः आयव्ययकयोः हिमाचलस्य जनानां वञ्चनं कृतम्। सः अवदत् यत् अस्मिन् बजटे किमपि नूतनं नास्ति। राज्यस्य जनाः १० गारण्टीनाम्ना सर्वकारेण वञ्चिताः, भाजपा जनान् अस्य विषये अवगतं कारयिष्यति।

## प्रतिज्ञाः पूर्णाः क्रियन्ते : मोहनलालब्राक्टा

मुख्यसंसदीयसचिवः (सीपीएस) मोहनलालब्राक्टा अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी जनेभ्यः १५ लक्षरूप्यकाणि दास्यामि इति प्रतिज्ञां कृतवान्, परन्तु अद्य एतत् प्रतिज्ञा कुत्र अस्ति। विपक्षः महिलाभ्यः १५०० रूप्यकाणां दानस्य विषयं निरन्तरं उत्थापयति। सः अवदत् यत् काङ्ग्रेसपक्षेण कृताः प्रतिज्ञाः चरणबद्धरूपेण पूर्णाः भवन्ति।

# Hotel Wildflower Hall : ओबरायसमूहाय एकवर्षाभ्यन्तरे निजातिथिगृहं रिक्तं कर्तुं सर्वोच्चन्यायालयस्य आदेशः

**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।** होटेलवाइल्डफ्लावरहॉल इत्यस्य प्रकरणस्य विषये सर्वोच्चन्यायालयात् हिमाचलसर्वकारेण महदाश्रयं प्राप्तम्। सर्वोच्चन्यायालयेन हिमाचल-उच्चन्यायालयस्य निर्णयस्य समर्थनं कृत्वा ओबेरॉय-समूहस्य कृते आघातं दत्तम्। अपि च सर्वोच्चन्यायालयेन ओबेरॉय-समूहाय एकवर्षेण अन्तः सम्पत्तिं रिक्तां कर्तुम् आदेशः दत्तः अस्ति। तस्मिन् एव काले हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सर्वोच्चन्यायालयस्य होटल वाइल्डफ्लावर हॉलसम्बद्धस्य हिमाचलप्रदेशस्य उच्चन्यायालयस्य निर्णयस्य समर्थनस्य निर्णयस्य स्वागतं कृतवान्। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारेण अस्य प्रकरणस्य प्रबलतया वैधानिकं पक्षम् उपस्थापितम्। यस्य फलस्वरूपं निर्णयः राज्यसर्वकारस्य पक्षे आगतः। राज्यस्य हितं मनसि कृत्वा सर्वोच्चन्यायालयेन हिमाचलप्रदेश- उच्चन्यायालयस्य निर्णयस्य समर्थनं कृतम्।

मुख्यमन्त्री अनुकूलनिर्णयस्य कारणं राज्यसर्वकारस्य सर्वोच्चन्यायालये प्रकरणस्य प्रभावीरूपेण प्रस्तुतीकरणस्य प्रयत्नस्य कारणेन अवदत्। सः अवदत् यत् राज्यसर्वकारेण राज्यस्य हितस्य रक्षणार्थं प्रतिबद्धप्रयत्नाः कृताः, प्रसिद्धस्य अधिवक्तुः मुकुलरोहतगी इत्यस्य माध्यमेन कानूनीयुद्धे सर्वकारस्य व्यापकप्रतिनिधित्वं सुनिश्चितं कृतम्। सर्वोच्चन्यायालयस्य एषः निर्णयः राज्यस्य हितस्य रक्षणार्थं सर्वकारस्य दृढनिश्चयं दर्शयति।

ध्यातव्यं वर्तते यत् होटल वाइल्डफ्लावर हॉल इत्यस्य सम्पत्तिः ओबेरॉय समूहेन सह बहुवर्षेभ्यः आसीत् अधुना सर्वोच्चन्यायालयेन तेभ्यः एकवर्षस्य अन्तः तत् रिक्तं कर्तुम् आदेशः दत्तः। मुख्यमन्त्री उक्तवान् यत् सम्पत्तेः स्वामित्वं प्राप्य राज्यसर्वकारः तस्य विषये भविष्यस्य कार्यविधिविषये चर्चां करिष्यति, हिमाचलस्य हितानुसारं निर्णयं च करिष्यति।

# हिमाचलाय विकासयोजना-निर्मातुः आवश्यकताः राजेश धर्माणी



हिमसंस्कृतवार्ता- शिमला।
तकनीकीशिक्षा तथा नगर-नियोजनं (टीसीपी) मन्त्री राजेशधर्माणी उक्तवान् यत् हिमाचलाय विकासयोजना निर्मातुं आवश्यकता वर्तते। अधुना शिमलानगरस्य विकासयोजना कृता। चरणबद्धरूपेण हिमाचले भवननिर्माणार्थं सम्पूर्णराज्यस्य कृते एषा योजना आवश्यकी अस्ति। सः अवदत् यत् आपत्काले हिमाचलप्रदेशे तानि एव भवनानि क्षतिग्रस्तानि अभवन् येषां संरचनात्मकविन्यासः सम्यक् नासीत्। राज्यम् अग्रे सारयितुं शिक्षाव्यवस्थायाः सुदृढीकरणम् आवश्यकम् इति सः अवदत्।

# आयव्ययकम् रिक्तम् - दीपराजः



भाजपाविधायकः दीपराजः मुख्यमन्त्रिणा प्रस्तुतं बजटं रिक्तम् इति उक्तवान्। अस्मिन् जनसमूहः वञ्चितः अस्ति। सर्वकारेण केन्द्रप्रायोजिताः योजनाः बजटे समाविष्टाः सन्ति। महिलाभ्यः १५००-१५०० रूप्यकाणि दास्यामि इति प्रतिज्ञां कृतवान् आसीत्। एषा घोषणा शून्या सिद्धा भवति। जीविकायाः नाम्ना यूनः वञ्चिताः भवन्ति।

# अलीखड्ड-पेयजलयोजनायै पूर्वसर्वकारेण प्रदत्तं प्राविधिकम् अनुमोदनम् - संजय अवस्थी



हिमसंस्कृतवार्ता- शिमला।
मुख्यसंसदीयसचिवः (सीपीएस) संजयः अवस्थी मुख्यमन्त्रिणा प्रस्तुतस्य आयव्ययकस्य प्रशंसाम् अकरोत्। अस्मिन् आयव्ययके राज्यस्य ग्राम्य-अर्थव्यवस्थां सुदृढं कर्तुं हिमाचलं स्वावलम्बनं च कर्तुं महत्त्वपूर्णानि पदानि गृहीतानि सन्ति। सः अवदत् यत् राजनैतिकबाध्यतायाः कारणेन विपक्षः अस्य आयव्ययकस्य विरोधं करोति। विवादास्पदायाः अलीखड्ड-पेयजलयोजनायाः विषये सः अवदत् यत् पूर्वसर्वकारस्य कार्यकाले अस्याः पेयजलयोजनायाः तकनीकी अनुमोदनं प्राप्तम्, वर्तमानसर्वकारेण एतत् कार्यम् अग्रे नीतम्। इयं पेयजलयोजना अर्कीक्षेत्रस्य राजस्व-अभिलेखेषु अस्ति।

# यदि आपदि केन्द्रेण धनं दत्तम् तर्हि श्वेतपत्रम् आनेतव्यम् : कुलदीपराठौरः

हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः। काङ्ग्रेसविधायकः कुलदीपसिंहराठौरः गतदिवसे बजटविषये चर्चायां उक्तवान् यत् यदि केन्द्रात् किञ्चित् आयव्ययकम् आगतं तर्हि केन्द्रप्रायोजितयोजनानाम् अन्तर्गतं प्राप्तम्। केन्द्रेण आपत्निवारणाय पर्याप्तं धनं न दत्तम्। यदि केन्द्रं धनविमोचनस्य विषये वदति तर्हि श्वेतपत्रं आनयन्तु। स्थितिः स्पष्टा भविष्यति। राठौरः अवदत् यत् गतवर्षस्य आपदाकारणात् हिमाचलप्रदेशः एकदशकं पश्चात् गतः, एतादृशं दृश्यं पूर्वं कदापि न दृष्टम्।



विपत्तौ हिमाचलस्य केन्द्रसर्वकाराद् यत् साहाय्यं प्राप्तम् तत् उष्ट्रमुखे जीरकम् इव अस्ति। सः अवदत् यत् राज्यसर्वकारस्य बजटेन प्रत्येकं वर्गं स्पृष्टम्। वर्षाणां पुरातनी सार्वभौमिकपेटिकाप्रयोगस्य प्रार्थना बजटे सर्वकारेण पूरिता।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य बलाहरपरिसरे सम्पन्ना सरलमानकसंस्कृतमिति विषये एकदिवसीया कार्यशाला



**हिमसंस्कृतवार्ताः, डॉ.अमनदीपशर्मा।** हिमाचलप्रदेशस्य कांगड़ाजनपदस्थे केन्द्रीयसंस्कृतविश्वविद्यालयस्य बलाहरपरिसरे सरलमानकसंस्कृतम् इति विषयमधिकृत्य एकदिवसीयायाः कार्यशालायाः समापनं फरवरीमासस्य २१ दिनांके बुधवासरे अभवत्। कार्यशालायाः शुभारम्भावसरे अतिथिषु केन्द्रीयसंस्कृतविश्वविद्यालयधर्मशालातः डॉ.बृहस्पतिमिश्रः श्रीलालबहादुरशास्त्रीसंस्कृतविश्वविद्यालयनवदेहलीतः डॉ.दिनेशयादवः, डॉ.परमेशशर्मा , बलाहरपरिसरस्य निदेशिका प्रो.सत्यमकुमारी, प्रो.मञ्जुनाथः एस.जी च उपस्थिताः आसन्। अतिथिभिः मातुः सरस्वत्याः पूजनं कृत्वा स्व-स्वविषयाणां प्रतिपादनं कृतम्। डॉ.दिनेशयादववर्येण स्वसम्बोधने उक्तं यत् विश्वे सर्वत्र संस्कृतभाषायाः प्रचारं प्रयोगञ्च च कर्तुम् वर्तमानसन्दर्भे सरलमानकसंस्कृतस्य आवश्यता अस्ति, तेनोक्तं यत् मानकं नाम भाषायाः समानरूपता भवेत्, तत्रैव डॉ.परमेशवर्येण सरलवाक्यैः प्रतिपादितं यत् सहजतया अस्माकं सामान्यव्यवहारे यस्याः भाषायाः प्रयोगः भवेत् सैव भाषा सरलमानकरूपेण ग्राह्या भवेत्। प्रतिदिनं क्रियमाणेषु कार्येषु संस्कृतभाषायाः प्रयोगविषये अस्माकं चिन्तनं भवेत्। कार्यक्रमस्य संयोजकेन डॉ.मनोजश्रीमालेन कार्यक्रमस्य साफल्याय सर्वेषां धन्यवादः प्रकटितः, तेनोक्तं यत् अस्मिन् कार्ये संलग्नानां डॉ.भूपेन्द्रकुमारओझा- डॉ.यज्ञदत्त-डॉ.गोविन्दशुक्ल- डॉ.योगेशपाण्डेय-डॉ.के.मनोज्ञा-डॉ.शैलेशकुमारतिवारि- श्रीनाथधरद्विवेदिसदृशानां सर्वेषां धन्यवादं ज्ञापयामि। परिसरस्य निदेशकवर्यया हिमाचलप्रदेशशिक्षाविभागस्यापि धन्यवादः प्रकटितः, येन स्वविभागस्य संस्कृतशिक्षकाः सरलमानकसंस्कृतमधिकृत्य कार्यशालायां भागं ग्रहीतुं प्रेषिताः। ध्यातव्यमस्ति यत् कार्यशालायामस्यां कांगड़ाजनपदस्य निकस्थानां विद्यालयानां संस्कृतशिक्षका अपि सोत्साहेन भागं गृहीतवन्तः तथा च स्व-स्वकार्यक्षेत्रे सरलमानकसंस्कृतम् स्वीकर्तुं प्रतिज्ञां कृतवन्तः। सर्वेभ्यः प्रमाणपत्रसमर्पणपुरस्सरं कार्यक्रमः संपन्नतां गतः।

# ऑस्ट्रेलियादेशेन षट् स्तोभैः विजिता न्यूज़ीलैंडविरुद्धम् अतीव रोमांचकारिणी विंशति- विंशतिः क्रिकेट-प्रतिस्पर्धा, मिशेल मार्शः चयनितः प्रतिस्पर्धायाः सर्वश्रेष्ठः क्रीडकः

**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा**

ऑस्ट्रेलिया- न्यूज़ीलैंडदेशयोः मध्ये अद्य त्रिस्पर्धात्मिका विंशति-विंशतिः क्रिकेटश्रृंखला प्रारब्धा। श्रृंखलायाः प्रथमा प्रतिस्पर्धा गतदिने वेलिंगटनस्थे स्काई क्रीड़ांगणे जाता। न्यूज़ीलैंडदेशेन टॉसं विजित्य प्रथमं फलकक्रीड़ा चयनिता। निर्धारितेषु विंशति-कन्दुकचक्रेषु न्यूज़ीलैंडदलेन फिन एलेनस्य 32, डिवॉन कॉन्वे इत्यस्य 63, रचिन रविन्द्रस्य च 68 धावनांकानां बलेन 215 धावनांकाः अर्जिताः, ऑस्ट्रेलियादलाय च 216 धावनांकानां लक्ष्यं दत्तम्। ऑस्ट्रेलियापक्षतः मिचेल स्टार्कः, पैट कमिन्सः, मिशेल मार्शश्च 1-1 स्तोभं प्राप्तवन्तः।



लक्ष्यप्राप्तिक्रमे ऑस्ट्रेलियादलेन इयं प्रतिस्पर्धा 20 कन्दुकचक्रेषु 216 धावनांकान् कृत्वा विजिता। अतीव रोमांचकारिणी इयं प्रतिस्पर्धा क्रीड़ायाः अन्तिमे कन्दुके समाप्ता। ऑस्ट्रेलियापक्षतः ट्रेविस हेडः 24, डेविड वार्नरः 32, मिशेल मार्शः अविजितः 72*, ग्लेन मैक्सवेलः 25, जोश इंग्लिश 20, टिम डेविडश्च अविजितः 31 धावनांकान् योजितवन्तः। अंतिमे कन्दुकचक्रे 15 धावनांकाः अपेक्षिताः आसन् ये ऑस्ट्रेलियादलेन अन्तिमे कन्दुके प्राप्ताः। मिशेल मार्शः प्रतिस्पर्धायाः सर्वश्रेष्ठः क्रीडकः चयनितः। श्रृंखलायाः अग्रिमा प्रतिस्पर्धा 23 फरवरी दिनांके भविष्यति।

# हिमाचलपर्यटनम्: आपदि अपि पर्यटनं वर्धितम्, २०२३ तमे वर्षे अभिलेखः १.६० कोटिः पर्यटकाः समागताः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे गतवर्षं पर्यटनव्यापारदृष्ट्या अतीव लाभप्रदम् आसीत्। राज्ये प्राकृतिकविपदायाः अभावेऽपि २०२३ तमे वर्षे देवभूमिहिमाचलस्य दर्शनार्थं अभिलेखात्मकरूपेण १.६० कोटिपर्यटकाः आगतवन्तः। विशेषं तु एतत् यत् २०२२ वर्षस्य तुलनायां पर्यटकानाम् आगमनस्य ५.९९ प्रतिशतं वृद्धिः अभवत्। पर्यटकप्रवाहस्य एषा वृद्धिः पर्यटनव्यापारे सम्बद्धानां व्यापारिणां कृते अवश्यमेव लाभप्रदा अभवत्, यत्र अतिथिगृहाणि, भोजनालयाः, टैक्सी-सञ्चालकाः च सन्ति। २०२२ तमे वर्षे १.५१ कोटिः पर्यटकाः राज्यं प्राप्नुवन्। यत्र २०२१ तमे वर्षे ५६.३७ लक्षं पर्यटकाः, २०२० तमे वर्षे ३२.१३ लक्षं पर्यटकाः आगताः आसन्।



२०२०-२१ तमे वर्षे Covid-19-कारणात् पर्यटनव्यापारः प्रतिकूलरूपेण प्रभावितः अभवत्, परन्तु Covid-19 इत्यस्य प्रतिबन्धाः हृताः ततः परं पुनः पर्यटकाः देवभूमिहिमाचलस्य भ्रमणं आरब्धवन्तः। यदि वयं पर्यटनविभागस्य विवरणानि पश्यामः तर्हि कुल्लु-मनाली पर्यटकानां प्रथमपरिचयः अभवत्। २०२३ तमे वर्षे कुल्लू मनाली-उपत्यकां २७.५९ लक्षं पर्यटकाः गतवन्तः। सोलनजनपदेन राज्ये २४.६४ लक्षपर्यटकैः द्वितीयस्थानं प्राप्तं, शिमला २१.४३ लक्षपर्यटकैः तृतीयस्थानं प्राप्तवान्। ६.७६ लक्षं पर्यटकाः काङ्गड़ां प्राप्तवन्तः।

# संस्कृतं मानवजीवने सङ्गणकवत् उपयुक्तम् - आचार्यः कुशलदेवः



**हिमसंस्कृतवार्ताः- सचिनशर्मा, मोदीनगरम्, गाजियाबादः, उ.प्र.।** उत्तरप्रदेशसर्वकारस्य भाषाविभागाधीनेन उत्तरप्रदेश- संस्कृतसंस्थानेन सञ्चालितानाम्ऑनलाइनसंस्कृत- शिक्षणवर्गाणाम् अन्तर्गतम् अस्मिन् मासे बौद्धिकसत्रस्य आयोजनं कृतम्। अस्मिन् मुख्यवक्तृरूपेण गुरुकुलमहाविद्यालयस्य ततारपुरस्य हापुडस्य संस्कृतप्रवक्ता उत्तरप्रदेश माध्यमिकसंस्कृतशिक्षापरिषद्, लखनऊ इत्यस्य पाठ्यक्रमसमित्याः सदस्यः च आचार्यकुशलदेवः उक्तवान् यत् अद्य संस्कृतं मानवजीवने सङ्गणकवत् उपयुक्तम् अस्ति। यथा सङ्गणके CPU-प्रधानः संसाधनः विभागः भवति, यथैव सर्वाः स्मृतयः तस्मिन् संगृह्यन्ते, तथैव संस्कृत-अध्येतॄणां सङ्गणकवत् अपारस्मृतिशक्तिः भवति। यथैव कुञ्चिकापटलं (कीबोर्ड) विना सङ्गणके किमपि कार्यं न सम्भवति, तथैव संस्कृतग्रन्थैः शास्त्रैः च विना मानवविकासः न भवति। यथा मूषकः (माउस) स्नेहेन संचालितः भवति, तथैव यदा गुरुहस्तः शिष्यस्य शिरसि तिष्ठति, तदा संस्कृते उपलभ्यमानं सर्वं ज्ञानं सहजतया लभ्यते। यू.पी.एस. अर्थात् अबाधितविद्युत्प्रदा इव संस्कृते दिव्यस्य अध्यात्मस्य च तत्वानि सूर्यवत् अस्मान् निरन्तरम् ऊर्जां प्रदास्यन्ति एव। अस्माकं जीवने संस्कृतस्य विकासस्य महत्त्वं वर्तते। यथा भण्डारणकार्यं पुटे वा सञ्चिकायां वा क्रियते, तथैव संस्कृतस्य ज्ञानं सर्वशास्त्रं च अस्माकं जीवनसञ्चिकायां संगृहीतुम् आवश्यकम्। संस्कृतच्छात्राणां नियोगाय अध्यापनक्षेत्रे कार्यम् अस्ति। उत्तरप्रदेशसंस्कृतसंस्थानद्वारा प्रतियोगिताः कारयित्वा पुरस्कारवितरणसमारोहः भवति। संस्कृतविदुषाम् उत्साह-प्रवर्धनार्थं संस्कृतस्य सम्यक् प्रचारार्थं च संस्कृतसाहित्यस्य, काव्यस्य, विविधशास्त्राणां च कृते विविधाः पुरस्काराः प्रदत्ताः भवन्ति। अस्माभिः मातृभक्त्या संस्कृतभाषायाः अध्ययनं करणीयम्। अस्माभिः पाश्चात्यसंस्कृतेः पृष्ठतः न धावितव्यम् अपितु संस्कृतिविकासं कृत्वा अस्माकं भारतीयधरोहरस्य रक्षणं करणीयम्।

कार्यक्रमस्य आरम्भः निखिलशर्मणः मंगलाचरणेन कविता अग्रवालस्य इत्यस्याः च सरस्वती वंदनाद्वारा कृतः। विदुषी अग्रवालद्वारा संस्थानगीतिका प्रस्तुता। आराधना रावत इत्यनया अतिथिनां परिचयः स्वागतं च कृतम्। कक्षाणाम् अनुभवकथनं स्मृतिगुप्ता, आदित्यरावत, डॉ. राघवेन्द्रमिश्रः, मुकेश लोधी, निशा पाण्डेया डॉ. भागीरथी मिश्रेण च कृतम्। निशा मीना सुमधुरं संस्कृतगीतं प्रस्तुतवती। कुशलतया मञ्चप्रबन्धनं सञ्चालनं च संस्थानप्रशिक्षकः सचिनशर्मणा एवं तकनीकीसहयोगः ओमदत्तद्विवेदी द्वारा कृतः। संस्थानस्य प्रशिक्षकः डॉ. सत्यप्रकाशमिश्रेण सर्वान् समागतान् प्रति आभारं धन्यवादं च ज्ञापितम्। अन्ते प्रदीप तिवारीद्वारा शांतिमन्त्रस्य पाठः कृतः। अवसरेऽस्मिन् संस्थानस्य निदेशकाः विनय श्रीवास्तवः, प्रशासनिक- अधिकारिणः दिनेश मिश्रः, जगदानंद झा, योजना सर्वेक्षिका: डॉ. चन्द्रकला शाक्या, प्रशिक्षणप्रमुखः सुधिष्ठमिश्रः, प्रशिक्षणसमन्वयकाः धीरजमैठाणी, दिव्यरञ्जन, राधाशर्मा च, अन्तर्जालद्वारा उपस्थिताः आसन्।

# व्याकरणाध्ययनस्य प्रयोजनानि--५



**प्रयोजनोपदेशः केषां कृते?**

किमेतानि सर्वाणि प्रयोजनानि केवलं व्याकरणम् अध्येतुकामानां कृते उक्तानि उत वेदाध्येतॄणां कृते अपि इति प्रश्नः। वेदानाम् अध्येतारः गुरुभिः 'अधीष्व भोः' इत्युक्ते ओङ्कारोच्चारणं कृत्वा अध्ययनारम्भं कुर्वन्ति। अनन्तरं प्रपाठकात् प्रपाठकं यावत् क्रमशः अध्ययनं कृत्वा अन्ते 'शम्' इत्युच्चार्य अध्ययनं स्थगयन्ति। एतेषां कृते व्याकरणाध्ययनस्य प्रयोजनानि उक्तानि सन्ति अथवा न?

पूर्वतनकाले उपनयनसंस्कारात् अनन्तरं बालाः प्रथमं व्याकरणं पठन्ति स्म। आरम्भे बालेभ्यः कण्ठादीनाम् वर्णोच्चारणस्थानानां, जिह्वाग्रोपाग्रादिकरणानाम् , आभ्यन्तरप्रयत्नानां बाह्यप्रयत्नानानां तेषु च श्वासानुप्रदाननादानुप्रदानयोश्च सम्यक् परिचयः कार्यते स्म। अनन्तरं तेभ्यः वैदिकशब्दाः उपदिश्यन्ते स्म। अधुना बालाः साक्षादेव वेदं पठन्ति व्याकरणाध्ययनं विना। एवं त्वरिताध्ययनं कृत्वा ते वदन्ति,'वयं तु वैदिकशब्दान् जानीमः यतः ते वेदात् सिद्धाः। वयं लौकिकं शब्दराशिम् अपि जानीमः लोकव्यवहारात्। तर्हि कुतः व्याकरणाध्ययनस्य आवश्यकता?' इति। 'वेदमधीत्य त्वरिता वक्तारो भवन्ति।' एतया विपरीतबुद्ध्या तेषाम् अध्ययने अनवस्था उत्पन्ना। सा न भवेत् इत्यर्थं तान् व्याकरणाध्ययने प्रेरयितुं तेषां सुहृद् भूत्वा आचार्यः पतञ्जलिः इमानि प्रयोजनानि उक्तवान्।

एतेन विवेचनेन ग्रन्थारम्भस्यास्य विषयअनुबन्धचतुष्टयम् उक्तम्। लौकिकाः वैदिकाश्च शब्दा अस्य विषयः। तस्य मुख्यानि पञ्च त्रयोदश गौणानि प्रयोजनान्यपि कथितानि। ग्रन्थविषययोः प्रतिपाद्य-प्रतिपादकभावः सम्बन्धः। यः शब्दशास्त्रे जिज्ञासुः सः अत्र अधिकारी।

## अनुशासनं केषां शब्दानाम् ? –



व्याकरणशास्त्रे उपदेष्टव्ये सति प्रश्नः उदेति –साधुशब्दानाम् उपदेशः कर्तव्यः उत असाधुशब्दानाम् उत उभयविधानाम् ? केचन वदन्ति एतयोः अन्यतरस्योपदेशः पर्याप्तः। यथा शशकः शल्यकी गोधा खड्गी, कूर्मश्च इत्येते पञ्च पञ्चनखाः भक्ष्याः इति भक्ष्यनियमे उक्ते ततोऽन्ये अभक्ष्याः इति सिध्यत्येव। 'पञ्च पञ्चनखा भक्ष्याः' इत्यत्र परिसङ्ख्या अस्ति। उक्तं च–

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते॥

यत् पूर्वं अत्यन्तम् अज्ञातं तस्य विधानं विधिरिति उच्यते। यथा दर्शपूर्णमासेष्ट्यां 'व्रीहीन् प्रोक्षस्व' इति विधानम्। व्रीहीनां प्रोक्षणं करणीयम् इति एतेन वचनेन विना व्रीहिप्रोक्षणरूपं यज्ञाङ्गम् अस्माभिः ज्ञातुं नैव शक्येत।

यत्र नैके पर्यायाः उपलब्धाः तत्र तेषु एकस्य विधानं नियमः। यथा व्रीहीन् निस्तुषान् कर्तुं तेषां अवहननम् , मर्दनं, नखविदलनं एते त्रयः पर्यायाः उपलब्धाः तथापि तत्र 'व्रीहीनवहन्ति' इति वाक्येन अवहननमेव आदिष्टम्। क्षुधितः मनुष्यः यत्किमपि भक्षयितुं प्रवृत्तः अतः 'पञ्च पञ्चनखा भक्ष्याः' इत्यनेन अपूर्वविधिः न कृतः। तथापि भोक्तुकामस्य केवलं पञ्चानामेव एव पञ्चनखानां भक्षणम् अनुमतम्। अन्येषां भक्षणस्य निषेधः।

एवमेव ग्राम्यकुक्कुटः ग्राम्यसूकरो वा अभक्ष्यः इत्युक्ते वन्यकुक्कुटसूकरौ भक्ष्यौ इति आनुषङ्गिकतया प्राप्यते । एवं तर्हि साधुशब्दोपदेशः अथवा असाधुशब्दोपदेशः एतयोः एकः पर्याप्तः स्यात्।

तथापि एकस्यैव शब्दस्य नैके अपभ्रंशाः विद्यन्ते यथा–गौः इति साधुशब्दस्य गोपा, गावी, गोणी, गोपोतलिका इत्यादीनि असाधुरूपाणि। अतः लघुतां विचार्य असाधुशब्दापेक्षया साधुशब्दकथमेव योग्यमिति प्राप्यते।

इदानीं द्वितीयः प्रश्नः उदीयात्। साधुशब्दोपदेशे कर्तव्ये किं मन्त्राणां पदपाठे दृष्टानां सर्वेषां साधुशब्दानां गौः अश्वः पुरुषः हस्ती शकुनिः मृगः इत्यादीनाम् उपदेशः देयः ?

एतन्न शक्यम्। कुतः? 'अनन्तपारं किल शब्दशास्त्रम्' इति उक्तम्। 'बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः ततोपि न चान्तं जगाम। किं पुनरद्यत्वे यः चिरं जीवति वर्षशतं जीवति।' बृहस्पतिरिन्द्राय शब्दोपदेशं दत्तवान्। तथापि एतदध्ययन-अध्यापनम् दिव्यवर्षसहस्रं यावत् प्राचलत् तथापि शब्दशास्त्रस्य अन्तः न अभवत्। इदानीतनकाले तु मर्त्यानामायुः केवलं शतं वर्षाणि।

अध्ययनं चतुर्षु भागेषु विभज्यते–आगमः (गुरुमुखात् श्रवणम्), स्वाध्यायः (स्वकृतम् अध्ययनम्) प्रवचनम् (पठितस्य व्याख्यानादि) व्यवहारे उपयोजनं च। तथापि शब्दशास्त्रस्य अपारत्वात् केवलं गुरुमुखात् श्रवणे एव मनुष्यस्य आयुः गच्छेत्। अतः प्रतिपदपाठं शब्दोपदेशः न शक्यः।

**श्री. अभिजित् तोडकरः**
**सुभाषितशिक्षणप्रमुखः संस्कृतभारती, पश्चिममहाराष्ट्रम्।**

# भाजपा सज्जा, प्रधानमन्त्री नरेंद्र मोदी, गृहमंत्री अमित शाहः, रक्षामंत्री राजनाथ सिंहश्च आगामिमासे बिहारम् आगमिष्यन्ति



**हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी**

आगामी लोकसभानिर्वाचनं दृष्ट्वा बिहारभाजपा सज्जतां तीव्रं कृतवती। लोकसभानिर्वाचनस्य औपचारिकघोषणात्पूर्वं दलस्य वरिष्ठनेतृणां बिहारभ्रमणस्य समयसूची निर्धारिता। दलस्य सूत्रानुसारं मार्चमासस्य प्रथमसप्ताहे प्रधानमन्त्री नरेन्द्रमोदी गृहमन्त्री अमितशाहः च बिहारस्य प्रवासं करिष्यतः, यत्र रक्षामन्त्री राजनाथसिंहः अपि अस्मिन् मासे बिहारम् आगमिष्यति। एतेषां कार्यक्रमः अन्तिमरूपेण निर्णीयते। प्रधानमन्त्री नरेन्द्रमोदी ३ मार्च दिनाङ्के बिहारम् आगन्तुं शक्नोति। प्रधानमन्त्री चम्पारणनगरे जनसभां सम्बोधयिष्यति। अस्मिन् काले सः केन्द्रसर्वकारस्य अनेकयोजनानां उद्घाटनम् अपि करिष्यति। अस्मात् पूर्वं जनवरी-फरवरीमासे प्रधानमन्त्रिणः प्रवासस्य कार्यक्रमद्वयं स्थगितम् आसीत्। अधुना मार्चमासस्य ३ दिनाङ्कस्य नूतना तिथिः बहिः आगता। गृहमन्त्री अमितशाहः अपि पटनाम् आगन्तुं गच्छति। सः ५ मार्च दिनाङ्के पटनानगरम् आगच्छति। अस्मिन् काले सः पटनानगरे भाजपाकार्यकर्तॄन् सम्बोधयिष्यति। अस्मिन् क्रमे उत्तरप्रदेशस्य उपमुख्यमन्त्री केशवप्रसादमौर्यः अपि एकदिनस्य प्रवासार्थं बिहारम् आगच्छति। सः २३ फरवरी दिनाङ्के आगन्तुं निश्चितः अस्ति। तेषां जनसभा शाहाबादक्षेत्रे भविष्यति। सः दलेन आयोजिते संतरविदाससमारोहे भागं ग्रहीष्यति। रक्षामन्त्री राजनाथसिंहः अस्मिन् मासे बिहारम् आगमिष्यति। तस्य प्रवासं २८ फरवरी दिनाङ्के भवितुम् अर्हति। अस्मिन् दिने सः सीतामढ़ी, छपरा, मधुबनी, दरभंगा वा कस्मिन् अपि स्थाने जनसभां सम्बोधयिष्यति। राजनाथसिंहस्य भ्रमणस्य कृते दलस्तरस्य सज्जता आरब्धा। एकदिनद्वयेन स्थानम् अन्तिमरूपेण निर्धार्य सूचना केन्द्रीयनेतृत्वं प्रति प्रेषिता भविष्यति।

# कांग्रेस-दलस्य सांसदः शशि थरूरः फ्रांसदेशीयेन सर्वोच्चनागरिकसम्मानेन सम्मानितः




**हिमसंस्कृतवार्ताः,युवराजभट्टराई।** प्रसिद्धः लेखकः राजनयिकः नेता च शशिथरूरः नव दिल्ल्याम् एकस्मिन् समारोहे फ्रांसस्य सर्वोच्च-नागरिक-सम्मानेन 'नाइट ऑफ द लीजन ऑफ ऑनर' इत्यनेन सम्मानितोऽभूत्। भूरि पुस्तकानां रचयिता तिरुवनन्तपुरम-क्षेत्रात् कांग्रेस-सांसदः शशिथरूरः फ्रांसीसी सीनेट इत्यस्य अध्यक्षेण जेरार्ड लार्चरः इत्यमुना फ्रांसदेशीये दूतावासे अनेन प्रतिष्ठितेन सम्मानेन समलङ्कृतः।

# प्रसिद्धानां भारतीयानां मेलापकानां विषये आयोजिता चर्चा संगोष्ठी




हिमसंस्कृतवार्ताः। जम्मूकाश्मीरराज्यस्य कठुआ जनपदान्तर्गते विश्वस्थलीति नगर्यां भारतीयसंस्कृतिपरम्परायाः तथा प्राच्यविद्यायाः संरक्षणार्थं प्रतिष्ठापितं चूडामणिसंस्कृतसंस्थानमिति पारम्परिकगुरुकुले वार्षिककार्यक्रमान्तर्गत प्रसिद्धमेला महत्वमिति विषयमुररीकृत्य विद्यार्थीनां चर्चा संगोष्ठी समायोजिता। कार्यक्रमः अयं गुरुकुलस्य प्रतिष्ठापकानां स्वर्गत.पण्डित डॉ उत्तमचन्दपाठकशास्त्रीमहोदयानां पितृपादानां स्वर्गत.पण्डितचूडामणिपाठकमहोदयानां पुण्यतिथिमभिलक्ष आयोजितमासीत्। कार्यक्रमस्य प्रारम्भः वैदिकमंगलाचरणेन समारब्धः । आदौ अतिथीनां तथा उपस्थितजनैः साकं छात्राः पंडित चूडामणि पाठक महोदयानां पटचित्रे माल्यार्पणं कृत्वा स्मृतिचारणं कृतवन्तः। गुरुकुलस्य प्राचार्य महोदयानां श्रीमतां डॉ सौम्य रञ्जन महापात्राणामाध्यक्षेन आयोजितायां संगोष्ठ्यामस्यां छात्राः भारतीयसंस्कृतेः मूलं सस्कृतं तथा प्रत्येकराज्यस्य विशिष्ट मेलानामुपरी आलोचनां कृतवन्तः। आध्यक्ष भाषणेन प्राचार्यमहोदयाः भारतीयानां सनतनीयपरम्पराविषये एवं लोकसंस्कृत्यादीनां परिचयं छात्रान् कारितवन्तः । वेदाध्यापकः अनमोल उपाध्यायः कार्यक्रमस्य कुंचिकाभाषणे संस्कृतसंस्कृतेः वैशिष्ट्यमुपरी स्वभिमतं प्रकट्यन् छात्रान् समृद्धिमयं जीवनगठनकर्तुं प्रेरणां दत्तवान्।प्रथमातृतीयवर्षस्य छात्रः शम्मीशर्मा जम्मूकाश्मीरराज्यस्य प्रसिद्धमेलानां विषये स्वकीय मतं दतवान् । द्वितीय वर्षस्य छात्रः गौरवशर्मा कवितामाध्यमेन मेलानां महत्वं प्रकटितवान्। तथैव अन्येपि छात्राः चर्चायां स्वाभिमतम् प्रकटितवन्तः । कार्यक्रमे आचार्यः शशिनाथ उपाध्यायः,आचार्यः साहिल शर्मा, आचार्यः राजेशरतनपालः, संस्थानस्य कर्मचारिणः तथा सर्वेऽपि छात्राः उपस्थिताः आसन्। सम्पूर्णकार्यक्रमं चिरंजीवी अश्विनदोत्रा परिचालना कृतवान् एवं चिरंजीवी विनयविलावरीया धन्यवादार्पणं कृतवान्